CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

६७

श्रीरामरक्षा विधि पत्र

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

१ श्रीरामायनमः शिरोमेराघवःपातुभालंदशरथात्मजः कौशल्येयोदृशौपातुविश्वामित्रप्रियश्रुती १ घ्राणंपातुमखत्रा
तामुखंसौमित्रिवत्सलः जिह्वांविद्यानिधिःपातुकंठंभरतवंदितः २ स्कंधौदिव्यायुधःपातुभुजौभग्नेशकार्मुकः करौसी
तापतिःपातुःहृदयंजामदग्न्यजित् ३ मध्यंपातुखरध्वंसीनाभिंजांबवदाश्रयः सुग्रीवेशःकटिंपातुसक्थिनीहनुमत्प्रभुः ४
[illegible] जानुनीसेतुकृत्पातुजंघेदशमुखांतकः पादौविभीषणश्रीदःपातुरामो
खिलंवपुः अथरामरक्षाविधानन्यासध्यानं ओंअस्यश्रीरामरक्षास्तोत्रमंत्रस्य बुधकौशिकऋषिः श्रीसीतारामचंद्रोदेवता अनुष्टुप्छंदः सीता
शक्तिःश्रीमान्हनुमान्कीलकं श्रीरामचंद्रप्रीत्यर्थेरामरक्षास्तोत्रजपेविनियोगः अथध्यानं ध्यायेदाजानुबाहुंधृतशरधनुषंबद्धपद्मासनस्थं पीतं
वासोवसानंनवकमलदलस्पर्धिनेत्रंप्रसन्नं १ वामांकारूढसीतामुखकमलमिलल्लोचनंनीरदाभं नानालंकारदीप्तंदधतमुरुजटामंडनंरामचंद्रं २
अथस्तोत्रं चरितंरघुनाथस्यशतकोटिप्रविस्तरं एकैकमक्षरंपुंसांमहापातकनाशनं १ ध्यात्वानीलोत्पलश्यामंरामंराजीवलोचनं जानकीलक्ष्मणोपेतं
जटामुकुटमंडितं २ सासितूणधनुर्बाणपाणिंनक्तंचरांतकं स्वलीलयाजगत्त्रातुमाविर्भूतमजंविभुं ३ रामरक्षांपठेत्प्राज्ञःपापघ्नींसर्वकामदां शिरोमेराघवःपातु
भालंदशरथात्मजः कौसल्येयोदृशौपातुविश्वामित्रप्रियःश्रुती ४ घ्राणंपातुमखत्राता मुखंसौमित्रिवत्सलः जिह्वांविद्यानिधिःपातुकंठंभरतवंदितः ५
स्कंधौदिव्यायुधःपातुभुजौभग्नेशकार्मुकः करौसीतापतिःपातुहृदयंजामदग्न्यजित् ६ मध्यंपातुखरध्वंसीनाभिंजांबवदाश्रयः सुग्रीवेशःकटिंपातु
सक्थिनीहनुमत्प्रभुः ७ ऊरूरघूत्तमःपातुरक्षःकुलविनाशकृत् जानुनीसेतुकृत्पातुजंघेदशमुखांतकः ८ पादौविभीषणश्रीदःपातुरामोऽखिलंवपुः
एतांरामबलोपेतांरक्षांयःसुकृतीपठेत् स चिरायुःसुखीपुत्रीविजयीविनयीभवेत् ९ पातालभूतलव्योमचारिणश्छद्मचारिणः नरामरक्षाहतारोभिभूतग्रहभयंकराः १०
असुरादिकृतायेयेपरतंत्रकृताश्चये विषदोषाश्चमंत्राश्चकुयंत्रादिकृतश्चये ११ सर्वेप्रशमंयांतिरामरक्षांपठेत्सदा प्रच्छर्दितस्वप्नविषसूचिकाविषगरादयः
१२ आदिष्टायेनरामेणस्वप्नेरामरक्षांपठेत्प्रातः कालंयःप्रयतोभूत्वा १३ वज्रपंजरनामेदंयोरामकवचंस्मरेत् अव्याहताज्ञःसर्वत्रलभतेजयमंगलं १४
आदेशंयःकरोतीदंस्वप्नेरामःसलक्ष्मणः तस्यसर्वेभयाःनश्यंतिनिशामयतिनान्यथा १५ आरामःकल्पवृक्षाणांविरामःसकलापदां अभिरामस्त्रिलोकानांरामःश्रीमान्
सनःप्रभुः १६ तरुणौरूपसंपन्नौसुकुमारौमहाबलौ पुंडरीकविशालाक्षौचीरकृष्णाजिनांबरौ १७ फलमूलाशिनौदांतौतापसौब्रह्मचारिणौ पुत्रौदशरथस्यौ
भ्रातरौरामलक्ष्मणौ १८ शरण्यौसर्वसत्त्वानांश्रेष्ठौसर्वधनुष्मतां रक्षःकुलनिहंतारौत्रायेतांनोरघूत्तमौ १९ आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ
रक्षणायमम रामलक्ष्मणावग्रतःपथिसदैवगच्छतां २० संनद्धःकवचीखड्गीचापबाणधरोयुवा गच्छन्मनोरथोस्माकंरामःपातुसलक्ष्मणः २१
रामोदाशरथिःशूरोलक्ष्मणानुचरोबली काकुत्स्थःपुरुषःपूर्णःकौसल्येयोरघूत्तमः २२ वेदांतवेद्योयज्ञेशःपुराणपुरुषोत्तमः जानकीवल्लभःश्रीमान्
अप्रमेयपराक्रमः २३ इत्येतानिजपन्नित्यंमद्भक्तःश्रद्धयान्वितः अश्वमेधाधिकंपुण्यंसंप्राप्नोतिनसंशयः २४ रामंदूर्वादलश्यामंपद्माक्षंपीतवाससं
स्तुवंतिनामभिर्दिव्यैर्नतेसंसारिणोनरः २५ रामंलक्ष्मणपूर्वजंरघुवरंसीतापतिंसुंदरं काकुत्स्थंकरुणार्णवंगुणनिधिंविप्रप्रियंधार्मिकं
राजेंद्रंसत्यसंधंदशरथतनयंश्यामलंशांतमूर्तिं वंदेलोकाभिरामंरघुकुलतिलकंराघवंरावणारिं २६ रामायरामभद्रायरामचंद्रायवेधसे रघुनाथायनाथाय
सीतायाःपतयेनमः २७ श्रीरामराघवदाशरथेमेघश्यामकाकुत्स्थपूर्णयदुनंदनदिव्यपुराणपुरुषोत्तमनारसिंहवासुदेवप्रतिपाल्यसंस्तुतप्रपन्नपारिजातपारायण
सर्वविनाशनलक्ष्मणपूर्वजवानराधिपसुग्रीवसख्यकरवालिप्रमथनसुग्रीवराज्यप्रदसर्वपुण्याधिकफलप्रदसत्यपराक्रमसत्यव्रतश्रीरामचंद्रपरब्रह्मणोनमः २८
श्रीरामचंद्रचरणौमनसास्मरामि श्रीरामचंद्रचरणौवचसागृणामि श्रीरामचंद्रचरणौशिरसानमामि श्रीरामचंद्रचरणौशरणंप्रपद्ये २९ माताराम
मत्पितारामचंद्रः स्वामीरामोमत्सखारामचंद्रः सर्वस्वंमेरामचंद्रोदयालुर्नान्यंजाने नैवजाने ३० दक्षिणेलक्ष्मणोयस्यवामेतुजनकात्मजा पुरतोमारुतिर्यस्य
तंवंदेरघुनंदनं ३१ लोकाभिरामंरणरंगधीरंराजीवनेत्रंरघुवंशनाथं कारुण्यरूपंकरुणाकरंतंश्रीरामचंद्रंशरणंप्रपद्ये ३२ मनोजवंमारुततुल्यवेगं
जितेंद्रियंबुद्धिमतांवरिष्ठं वातात्मजंवानरयूथमुख्यंश्रीरामदूतंशरणंप्रपद्ये ३३ कूजंतंरामरामेतिमधुरंमधुराक्षरं आरुह्यकविताशाखांवंदेवाल्मीकिकोकिलं
३४ आपदामपहर्तारंदातारंसर्वसंपदां लोकाभिरामंश्रीरामंभूयोभूयोनमाम्यहं ३५ भर्जनंभवबीजानामर्जनंसुखसंपदां तर्जनंयमदूतानांरामरामेतिगर्जनं
३६ रामोराजमणिःसदाविजयतेरामंरमेशंभजे रामेणाभिहतानिशाचरचमूरामायतस्मैनमः रामान्नास्तिपरायणंपरतरंरामस्यदासोस्म्यहं
रामेचित्तलयःसदाभवतुमेभोरामामामुद्धर ३७ रामरामेतिरामेतिरामेरामेमनोरमे सहस्रनामतत्तुल्यंरामनामवरानने ३८ इतिश्रीबुधकौशिकविरचितंश्रीरामरक्षास्तोत्रं
संपूर्णं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

२ जगतिवर्तते ८ तत्सर्वंमिहिमाश्रोत्रिरामरक्षाविधारणात् रामरक्षाविधानंहिमयाप्रोक्तंसुरेश्वरि ९ आद्येसादिममश्रीरा
मचंद्रमसादिस्मरभ्यबंध्यादोषनिवारणार्थंरानसंख्याकंश्रीरामरक्षापाठमहंकरिष्ये १० इतिश्रीरामरक्षाविधिसमाप्तः
अविघ्नेअनेकानुष्ठानसिद्ध्यर्थंसकलैश्वर्यमहोन्नतैः पुत्रपौत्रविवृद्ध्यर्थंसर्वपापक्षयार्थंसमारभेत् मंत्रः अपेयंसर्वमामान्याभूतेभ्यःप्रति
पा पादिनाअस्मांप्रेरनाभिनरक्षपंतुहिपिनामहाः अभिर्वायंननोदेयजलमासचतुष्टयं प्रपादानाशकेनधनधर्मघटोदकं
इत्यप्रपादानविधिः इतिश्रीविष्णुलालपाठकेनसंगृहीता श्रीरामनुग्रहार्थंश्रीरामरक्षापाठप्रयोगालीखितेसंपूर्णंसंपूर्ण
श्रीगोपीजनवल्लभायनमः ओंअस्यश्रीभागवतमालामंत्रस्यश्रीभगवान्महाकारुणिकोवादरायणऋषिःगायत्रीछंदःश्रीगोपाल
देवताश्रीगोपालप्रीत्यर्थंजपेविनियोगः ओंनमोभगवतेवासुदेवायेतिपरमोमंत्रः तस्मात्सर्वात्मनाशक्तिः शक्तिः स्वगुरुः
इतिकीलकं यद्वयाद्यतिवातोयेइत्यस्त्रं हरिर्दृष्ट्याभिरक्षकवचं हंसवर्णंवह्निध्यानं द्वादशाक्षरमंत्रेकरन्यासं ॐतत्कालेतु
पुरुषंवैष्णवीबीजंइतिश्रीभागवतपाठविधिमंत्रजपः८...

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi